॥ वैद्यनाथाष्टकम् ॥

श्रीरामसौमित्रिजटायुवेद षडाननादित्य कुजार्चिताय ।

श्रीनीलकण्ठाय दयामयाय श्रीवैद्यनाथाय नमःशिवाय ॥ १॥

शंभो महादेव शंभो महादेव शंभो महादेव शंभो महादेव ।

शंभो महादेव शंभो महादेव शंभो महादेव शंभो महादेव ॥

गङ्गाप्रवाहेन्दु जटाधराय त्रिलोचनाय स्मर कालहन्त्रे ।

समस्त देवैरभिपूजिताय श्रीवैद्यनाथाय  नमः शिवाय ॥ २॥

भक्तःप्रियाय त्रिपुरान्तकाय पिनाकिने दुष्टहराय नित्यम् ।

प्रत्यक्षलीलाय मनुष्यलोके श्रीवैद्यनाथाय नमः शिवाय ॥ ३॥

प्रभूतवातादि समस्तरोग प्रनाशकर्त्रे मुनिवन्दिताय ।

प्रभाकरेन्द्वग्नि विलोचनाय श्रीवैद्यनाथाय नमः शिवाय ॥ ४॥

वाक् श्रोत्र नेत्राङ्घ्रि विहीनजन्तोः वाक्श्रोत्रनेत्रांघ्रिसुखप्रदाय ।

कुष्ठादिसर्वोन्नतरोगहन्त्रे श्रीवैद्यनाथाय नमः शिवाय ॥ ५

वेदान्तवेद्याय जगन्मयाय योगीश्वरद्येय पदाम्बुजाय ।

त्रिमूर्तिरूपाय सहस्रनाम्ने श्रीवैद्यनाथाय नमः शिवाय ॥ ६॥

स्वतीर्थमृद्भस्मभृताङ्गभाजां पिशाचदुःखार्तिभयापहाय ।

आत्मस्वरूपाय शरीरभाजां श्रीवैद्यनाथाय नमः शिवाय ॥ ७॥

श्रीनीलकण्ठाय वृषध्वजाय स्रक्गन्ध भस्माद्यभिशोभिताय ।

सुपुत्रदारादि सुभाग्यदाय श्रीवैद्यनाथाय नमः शिवाय ॥ ८॥

वालाम्बिकेश वैद्येश भवरोगहरेति च ।

जपेन्नामत्रयं नित्यं महारोगनिवारणम् ॥ ९॥